# प्रतिवेदनम्
## सत्रम् – 2023-24

देवभूमौ हिमाचले भारतभारतीसमाराधनतत्पराणां समीपस्थग्राममग्रामणीग्रामटिकापुरवासिनां पवित्रविचारसारणीमवगाहनधिया 1928 तमे वर्षे संस्कृतपाठशाला नाम्ना संस्थापितोऽयं महाविद्यालयः संस्कृतसंस्कृतिसभ्यतासंस्कारादीनां गुणानां संवर्धनं प्रचारञ्च करोति । प्रारम्भेऽत्र कर्मकाण्डप्रशिक्षणं दीयते स्मः। स्वतन्त्रताप्राप्तेरनन्तरमस्य महाविद्यालयस्य प्रथमा सम्बद्धता पञ्जाबविश्वविद्यालयेन (चण्डीगढेन) सहाभवत् ।

1971 तमे वर्षे हिमाचलप्रदेशविश्वविद्यालयस्यास्तित्वे सति महाविद्यालस्यास्य सम्बद्धता हिमाचलप्रदेशविश्वविद्यालये शिमलायां स्थानान्तरिताऽभवत् ।

पूर्वप्राचार्याणां ब्रह्मलीनां **प्रो. भक्तवत्सलशर्म**महोदयानां कुशलनेतृत्वे तथा च मातृसंस्थाया अध्यक्षचराणां ब्रह्मलीनानां **श्रीरणजीतसिंह**महोदयानां कुशलमार्गनिर्देशने 1993 तमे वर्षे महाविद्यालयोऽयं भारतसर्वकारस्य मानवविकाससंसाधनविकासमन्त्रालयाधीनस्य राष्ट्रियसंस्कृतसंस्थानस्य (मानितविश्वविद्यालयस्य) आदर्शसंस्कृतमहाविद्यालययोजनायामधिग्रहितोऽभूत् इति गर्वस्य गौरवस्य च विषयः ।

अत्र न केवलं विश्वविद्यालयीयौपचारिकपाठ्यक्रमाधारेण सुचारुपाठनव्यवस्थाऽस्ति, अपि तु पाठ्यक्रमेतरसंस्कृतिसंस्कारधर्मादीनामपि प्रकर्षाय सततं प्रयतते महाविद्यालयोऽयम् । आदर्शसंस्कृतमहाविद्यालयरूपिविकसितः पुष्पः संस्कृतशिक्षणजगति सुवासते । एतस्यैव प्रतिफलं यद् हिमाचलप्रदेशविश्वविद्यालयस्य पाठ्यक्रमानुगुणं वेद-व्याकरण-साहित्य-ज्योतिष-दर्शनेतिहासकाव्यनाट्यनाटकादिपारम्परिकविषयैः सह आधुनिकविषयेषु हिन्दी-आङ्गल-राजनीतिशास्त्रेतिहासादीनाम् अध्यापनेन कुशलप्राध्यापकानां पाठनकौशलेन प्रतिवर्षम् उत्तमोत्तमपरीक्षापरिणामो गौरवास्पदो भवत्येव ।

एतदतिरिक्तं ज्योतिषकर्मकाण्डप्रशिक्षणम्, संस्कृतसम्भाषणप्रशिक्षणम्, योगप्रशिक्षणं, प्रतियोगिपरीक्षास्वपि शिक्षणमार्गदर्शनकेन्द्ररूपेण नियमितच्छात्राणां पूर्वच्छात्राणाञ्च निःशुल्कशिक्षणं मार्गदर्शनं चास्य महाविद्यालयस्य प्रकृष्टः प्रकल्पः महाविद्यालस्य ख्यातिं ख्यापयत्यैव ।

इतोऽप्यधिकं हर्षस्य विषयो वर्त्तते यद् वर्त्तमाने 2024-25 तमे सत्रे महाविद्यालस्य सम्बद्धता केन्द्रीयसंस्कृतविश्वविद्यालयेन सञ्जाता वर्त्तते ।

माननीयानां यशस्विनां **प्रो. श्रीनिवासवरखेडी**वर्याणां कुलपतीनां निपुणनिर्देशने संरक्षणे वित्तपोषणे च महाविद्यालयोऽयं संस्कृतसेवायामग्रसरो वर्त्तते ।

**छात्रसङ्ख्या -**

2023-24 सत्रे अत्र एकोत्तरचतुश्शतं (401) छात्राः प्रविष्टा आसन् । एतेषु बहवो हिमाचलप्रदेशस्य सुदूरवर्त्तिभ्यो दुर्गमस्थलेभ्यः चम्बा-किनौर-सोलन-शिमला-सिरमौरप्रभृतिभ्यः

स्थानेभ्य आगत्य शिक्षां लभन्ते । एतन्महाविद्यालस्य कृते गर्वस्य गौरवस्य च विषयः ।

**गतिविधयः** -

संस्कृतं व्यवहारिकी भाषा स्यादेतस्य पुण्यकर्मणः कृते महाविद्यालयो नितरां प्रयतते साफल्याय च नैके कार्यक्रमाः समायोजयन्ते । एतेषु 'संस्कृतसम्भाषणशिविरम्' इत्ययं प्रथमः कल्पः। एवमेव वेद-व्याकरण-ज्योतिष-साहित्यदर्शनादिविषयान् अधिकृत्य व्याख्यानमालाया आयोजनं विधीयते ।

महाविद्यालयस्य संस्कृतसंस्कृतिञ्च प्रति अप्रतिमश्रद्धया प्रचारेण प्रसारेण चाविभूय हिमाचलसंस्कृत-अकादमीद्वारा 14/08/2022 तमे दिनाङ्के संस्कृतसम्मेलनं महाविद्यालये समायोजितम् । समायोजितेऽस्मिन् कार्यक्रमे आहिमाचलात् सम्प्राप्तैः नैकज्ञानवृद्धैः वयोवृद्धैश्च विद्वद्भिः संस्कृतस्य प्रासङ्गिकताविषये सारगर्भितं वक्तव्यं समुपस्थाप्य समान्यजनानां संस्कृताध्ययनं प्रत्यभिरूचिः समुत्पादिता वर्धिता च । एतस्मिन् सम्मेलने आप्रदेशादागतैः पञ्चसंस्कृतविद्वद्भिः सरलमानकसंस्कृतम् इत्यनया रीत्या शोधपत्राणि पठितानि । हिमाचलसंस्कृत-अकादम्याः सचिवपदे राजतां **डॉ. केशवरामशर्म**महोदयानां सततोपस्थितिः संस्कृतकार्यकर्तृणां कृते उत्साहवर्धिका खलु। एतस्य कार्यक्रमस्य साफल्याय स्थानीयप्राध्यापकानां वैदुष्यपूर्ण सञ्चालनमविस्मरणीयं प्रशस्यमजायत्।

संस्कृतभाषा जनभाषा भवेदिति संस्कृतभारत्याः सङ्कल्पात् सर्वे भारतीयाः परिचिताः सन्ति। संस्कृतभारती विगतानेकवर्षेभ्यः निजनिःस्वार्थसङ्कल्पनाप्रतिपूर्त्यर्थं सततसम्पृक्ताऽस्ति। संस्कृतभारत्याः सौजन्येन महाविद्यालयीयप्राध्यापकानाञ्च सहयोगेन राधाकृष्णमन्दिर बाबा बालजी आश्रम, ऊना इति स्थाने राज्यस्तरीयं संस्कृतसम्मेलनं समायोजितं यत्र महाविद्यालयीयाः पञ्चदश छात्राः भागं ग्रहीतवन्तः।

**उपलब्धयः -**

**1) युवमहोत्सवः -**

केन्द्रीयसंस्कृतविश्वविद्यालयस्य (नवदेहल्याः) वेदव्यासपरिसरे (बलाहरक्षेत्रे) आयोजितेऽस्मिन् द्वितीये उत्तरक्षेत्रीय युवमहोत्सवे डॉ. रविदत्तशर्मणः डॉ. प्रीतमसिंहस्य सुश्रीवैजयन्तीमालायाश्च च मार्गनिर्देशने महाविद्यालयः आहत्य विजयवैजयन्तीपुरस्कारेण पुरस्कृतः । महोत्सवेऽस्मिन् केन्द्रीयसंस्कृतविश्वविद्यालस्य अष्टौ परिसराः महाविद्यालयाश्चासन् तेषु तृतीयं स्थानं प्राप्तवान् महाविद्यालयः । तत्र महाविद्यालयः 10 स्वर्णपदकानि, 23 रजतपदकानि 06 कांस्यपदकानि च प्राप्तवान् ।

**2) अखिलभारतीयशास्त्रीयस्पर्धा -**

केन्द्रीयसंस्कृतविश्वविद्यालयस्य (नवदेहल्याः) वेदव्यासपरिसरे (बलाहरक्षेत्रे) आयोजितायामस्यां स्पर्धायां डॉ. प्रीतमसिंहस्य मार्गनिर्देशने महाविद्यालस्य आहत्य अष्टौ (8) विद्यार्थिनः (04 दर्शने+1 ज्योतिषे+1 आयुर्वेदे+2 शास्त्रस्फूर्तौ) प्रथमं स्थानं प्राप्तवन्तः । त्रयः (03) विद्यार्थिनः (1 साहित्ये, 1 अष्टाध्यायीकण्ठपाठे,1 विज्ञानभाषणे) द्वितीयं स्थानं प्राप्तवन्तः । त्रयः

(03) विद्यार्थिनः (1 समस्यापूर्तौ, 1 धर्मशास्त्रभाषणे, 1 अमरकोशकण्ठपाठे) तृतीयं स्थानं प्राप्तवन्तः ।

3) हिमाचलसंस्कृत-अकादम्या (शिमलया) सोलननगरे आयोजितायां राज्यस्तरीयप्रतियोगितायां डॉ. मुकेशकुमारस्य डॉ. अरुणादेव्याः च मार्गनिर्देशने महाविद्यालयः द्वयोः स्पर्धयोः द्वितीयम् एकस्यां स्पर्धायां च तृतीयं स्थानं प्राप्य आहत्य द्वाविंशतिमहाविद्यालयेषु तृतीयं स्थानं प्राप्तवान् ।

**4) क्षेत्रस्तरीया / राज्यस्तरीया / राष्ट्रियस्तरीयस्पर्धा -**

भाषा एवं संस्कृतिविभागेन हिमाचलप्रदेशेन हमीरपुरे आयोजितायां राज्यस्तरीयसंस्कृत-अन्तर्महाविद्यालीय-प्रतियोगितायां दर्शनविषयान्तर्गतगीताकण्ठपाठस्पर्धायां डॉ. प्रीतमसिंहस्य मार्गनिर्देशने महाविद्यालयः द्वितीयं तृतीयं स्थानं च प्राप्तवान् ।

**5) रूपकमहोत्सवः -**

केन्द्रीयसंस्कृतविश्वविद्यालयस्य (नवदेहल्याः) वेदव्यासपरिसरे (बलाहरक्षेत्रे) आयोजितेऽस्मिन् रूपकमहोत्सवे डॉ. मुकेशकुमारस्य मार्गनिर्देशने महाविद्यालयः सान्त्वनापुरस्कारेण पुरस्कृतः ।

**6) संस्कृत-ओलम्पियाडस्पर्धा -**

केन्द्रीयसंस्कृतविश्वविद्यालयेन ऑनलाईनमाध्यमेन सञ्चालितायामस्यां राष्ट्रीयस्पर्धायां महाविद्यालयस्य शास्त्रीद्वितीयवर्षीया छात्रा शानवी द्वितीयं स्थानं प्राप्तवती । अस्य कार्यक्रमस्य संयोजकः डॉ. मुकेशकुमारः पुरस्कृतः । शताधिकपञ्जीकरणेन महाविद्यालयः प्रशस्तिपत्रमाप्तवान् ।

**7) शलाकास्पर्धा -**

चामुण्डानगरे संस्कृतभारत्या आयोजितायां राज्यस्तरीयशलाकास्पर्धायां डॉ. मुकेशकुमारस्य मार्गनिर्देशने महाविद्यालयस्य छात्रा दीक्षा द्वितीयं स्थानमाप्तवती ।

8) **गीता-ओलम्पियाडस्पर्धा -** अस्यां स्पर्धायां डॉ. प्रीतमसिंहस्य संयोजने महाविद्यालयपक्षतः 106 प्रतिभागिनः भागं ग्रहितवन्तः ।

**9) राज्यस्तरीययोगासनप्रतियोगिता -**

हिमाचलप्रदेशस्य सोलनजनपदे आयोजितायां 'विंशतितमराज्यस्तरीययोगासन'प्रतियोगितायां महाविद्यालयः द्वितीयं स्थानं, द्वे तृतीयस्थाने च प्राप्तवान् । एवमेव युवसम्मेलने योगासने महाविद्यालयः तृतीयं स्थानमाप्तवान्, तत्र मार्गदर्शकरूपेण सुश्री वैजयन्तीमाला डॉ. प्रीतमसिंहः चास्ताम् ।

**समितयः -**

महाविद्यालये प्रतिवर्षं शैक्षणिकसत्रारम्भात् सत्रान्तं यावत् संस्कृतसंवर्धनाय संस्कृतेश्च संरक्षणाय नैकाः समितयः संरच्यन्ते । एताः समितयः महाविद्यालयीयमुख्यकार्यक्रमाणां निर्वहनाय कार्यं करोति । समायोजितकार्यक्रमाणां प्रतिवेदनमपि समर्पयति । तत्र समितयः सन्ति -

**रैगिंगनिषेधसमितिः** - रैगिंग इत्यस्य निषेधार्थम् ।

**क्रयविक्रयसमितिः** - महाविद्यालस्य संसाधनानां क्रयविक्रयार्थम् ।

**प्लेसमेण्ट-सेल** - विद्यार्थिनामुज्ज्वलभविषयनिर्णयार्थम् ।
**छात्रशिकायतकक्षः -** विद्यार्थिनामुत्पीडनरोधनाय ।
**योगसमितिः** - महाविद्यालये प्रायोगिकयोगप्रशिक्षणस्य दायित्वम् ।
**स्वास्थ्यसमितिः** - महाविद्यालये शिक्षणकाले प्राथमिकोपचारव्यवस्थादायित्वम् ।
**पुस्तकालयसमितिः** - पुस्तकालयसामग्रीसम्बन्धितावश्यकतापूर्त्यर्थम् ।
**आपदाप्रबन्धसमितिः** - प्राकृतिकापात्काले दायित्वनिर्वहनम् ।
**आन्तरिकशिकायतनिवारणसमितिः** (ICC) - प्राप्तशिकायतादीनामान्तरिकरूपेण विचार्य समाधानं करोति ।
**अनुसूचित/ जनजातिविवरणकक्षः -** आरक्षितश्रेणीविवरणम् ।
**पुरस्कारवितरणसमितिः -** विद्यार्थिनां कृते स्पर्धादिषु प्राप्तपुरस्काराणां वितरणाय व्यवस्थां करोति ।
**अनुशासनसमितिः -** अनुशासनपरिरक्षणकर्मणि योगदानमेव अस्याः समितेः दायित्वम् ।
**स्वच्छतासमितिः -** महाविद्यालस्य स्वच्छतासमीक्षणम् ।

**डॉ. लालसिंहपठानिया**
**प्राचार्यः**